# संस्कृतवार्ता:

दिनाङ्क :-04.01.2025

प्रात: - 06:55

<u>प्रधानमन्त्री-ग्रामीणमहोत्सव:</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्लयां पञ्चविंशत्यधिकाद्विसहस्रतमं ग्रामीणभारत-महोत्सवम् उद्घाटयिष्यति। श्रीमोदी अत्रावधौ एकं जनसमागमपि सम्बोधयिष्यति। अस्माकं वार्ताहर: सूचितवान् यत् अस्य महोत्सवस्य उद्देश्यं ग्रामीणस्तरीयानाम् आधारभूतसंरचनानां ग्रामीणसमुदायेषु च नवाचारस्य संवर्धनमिति विद्यते। एतस्मिन् महोत्सवे जीवन्त-प्रदर्शनानां प्रदर्शनीनाञ्च माध्यमेन भारतस्य समृद्ध-सांस्कृतिक-न्यासमपि प्रदर्शयिष्यते।

<u>जितेन्द्र: - स्थापनादिवस:</u>

केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र सिंह: अद्य नवदिल्लां वैज्ञानिक-औद्योगिकानुसन्धान-विभागस्य चत्वारिंशत्तमे स्थापनदिवससमारोहे भागं भजिष्यति। एतस्मिन् कार्यक्रमे भारतप्रशासनस्य प्रधान-वैज्ञानिक-परामर्शद: प्रो. अजयकुमारसूद: औद्योगिकानुसन्धानपरिषद: च महानिदेशक: अपि उपस्थितौ भविष्यति:। अस्य समारोहस्य उद्देश्यं विभिन्नानां कार्यक्रमाणां माध्यमेन औद्योगिकानुसन्धानं नवाचारं च अग्रे समेधितुं विभागस्यास्य भूमिकासम्मानं वर्तते।

<u>जयशङ्कर-मालदीवदेश:</u>

विदेशशमन्त्री डॉ. एस्. जयशङ्कर: ह्य: नवदिल्ल्यां मालदीवदेशीयेन विदेशमन्त्रिणा डॉ. अब्दुल्ला-खलील-इत्यमुना सह चर्चां विहितवान्। डॉ. जयशङ्कर: द्वीपराष्ट्रै: सह भारतेन प्रदीयमानानां द्विपक्षीय-सम्बन्धानां महत्वस्यापि पुष्टिं कृतवान् अपि च भारतस्य प्रतिवेशि-प्रथमं इति नीतिम् आधृत्य मालदीवदेशाय सततं समर्थनस्य आश्वासनमपि प्रदत्तवान्। असौ विगतवर्षे अक्टूबरमासे मालदीवस्य राष्ट्रपते: डॉ. मोहम्मद-मुइज्जू-इत्येतस्य भारतस्य राजकीययात्रावधौ जातायां सहमत्यां सज्जातप्रगतिमपि समीक्षितवान्।

<u>कर्मचारिभविष्यनिधि</u>

कर्मचारि-भविष्य-निधि-सङ्घटनस्य केन्द्रीयकृत-वेतन-देयराशि-प्रणाली सम्प्रति समग्रदेशे पूर्णतया सञ्चालिता। विगतवर्षे दिसम्बरमासे अस्य सङ्घटनस्य सर्वै: द्वाविंशत्यधिकैकशत-वेतन-वितरण-क्षेत्रीय-कार्यालायै: सम्बद्धा: अष्टषष्टि-लक्षाधिकं वेतनप्राप्तकर्तृभ्य: भूयोऽपि सप्तत्यधिक-पञ्चशतोत्तरैक-सहस्रकोटिरूप्यकाणां वेतनानि वितरितानि।

**भारत-ईरानदेशौ**

भारत ईरानदेशौ चाबहार-जलपोतस्थानकं कृषि-सहयोगं व्यापारार्थिक- प्रसङ्गं च समेत्य उभयो: देशयो: द्विपक्षीयसम्बन्धानां सम्पूर्ण-आयामान् समीक्षितवन्तौ। नवदशतमस्य भारत-ईरानविदेशकार्यालय-परामर्शस्य आयोजनं ह्य: नवदिल्लयां समनुष्ठितम्। विदेशसचिव: विक्रममिस्री इत्येष: ईरानदेशस्य च उपविदेशमन्त्री माजिदतख्त-रवांची इत्यसौ च अस्य परामर्शकपूर्वकस्य सम्मेलनस्य सहाध्यक्षतां कृतवन्तौ।

**ऋतुविभाग:**

उत्तरभारतस्य विभिन्नेषु भागेषु सघनकुञ्झटिकया तीव्रशैत्यप्रकोपेन च सामान्यजन-जीवनम् प्रभावितम्। अद्य प्रात:काले केषुचित् भागेषु नीहारप्रभावेन दृश्यता शून्यं यावत् न्यूनीजाता। दिल्ली-उत्तरप्रदेश-हरियाणा-राज्यानां भागेषु वाहनानि मन्दगत्या प्रचलन्ति। अपि च अनेकानि विमानानि विलम्बेन प्रचलन्ति। भारतीय- ऋतु-विज्ञान-विभागेन दिवसद्वयं यावत् उत्तरपश्चिम-भारतस्य केषुचित् स्थलेषु सघनकुञ्झटिका शैत्यप्रकोप: च अनुमानित: ।

।। इति वार्ता:।।